**॥ श्री नृसिंह मंत्रराजपद स्तोत्रं ॥**

पार्वत्युवाच –
मन्त्राणां परमं मन्त्रं गुह्यानां गुह्यमेव च ।
ब्रूहि मे नारसिंहस्य तत्त्वं मन्त्रस्य दुर्लभम् ॥
शंकर उवाच –
वृत्तोत्फुल्लविशालाक्षं विपक्षक्षयदीक्षितं ।
निनादत्रस्तविश्वाण्डं विष्णुमुग्रं नमाम्यहम् ॥ १ ॥
सर्वैरवध्यतां प्राप्तं सबलौघं दितेस्सुतं ।
नखाग्रैश्शकलीचक्रेयस्तं वीरं नमाम्यहम् ॥ २ ॥
पादावष्टब्धपाताळं मूर्धाऽऽविष्टत्रिविष्टपं ।
भुजप्रविष्टाष्टदिशं महाविष्णुं नमाम्यहम् ॥ ३ ॥
ज्योतींष्यर्केन्दुनक्षत्रज्वलनादीन्यनुक्रमात् ।
ज्वलन्ति तेजसा यस्य तं ज्वलन्तं नमाम्यहम् ॥ ४ ॥
सर्वेन्द्रियैरपि विना सर्वं सर्वत्र सर्वदा ।
जानाति यो नमाम्याद्यं तमहं सर्वतोमुखम् ॥ ५ ॥
नरवत्सिंहवच्चैव रूपं यस्य महात्मनः ।
महासटं महादंष्ट्रं तं नृसिंहं नमाम्यहम् ॥ ६ ॥
यन्नामस्मरणाद्भीता भूतवेताळराक्षसाः ।
रोगाद्याश्च प्रणश्यन्ति भीषणं तं नमाम्यहम् ॥ ७ ॥
सर्वेऽपि यं समाश्रित्य सकलं भद्रमश्नुते ।
श्रिया च भद्रया जुष्टो यस्तं भद्रं नमाम्यहम् ॥ ८ ॥
साक्षात्स्वकाले सम्प्राप्तं मृत्युं शत्रुगणानपि ।
भक्तानां नाशयेद्यस्तु मृत्युमृत्युं नमाम्यहम् ॥ ९ ॥
नमस्कारात्मकं यस्मै विधायात्मनिवेदनं ।
त्यक्तदुःखोऽखिलान्कामानश्नुते तं नमाम्यहम् ॥ १० ॥
दासभूतास्स्वतस्सर्वे ह्यात्मानः परमात्मनः ।
अतोऽहमपि ते दास इति मत्वा नमाम्यहम् ॥ ११ ॥
शंकरेणादरात्प्रोक्तं पदानां तत्त्वमुत्तमं ।
त्रिसन्ध्यं यो जपेत्तस्य विद्याऽऽयुश्श्रीश्च वर्धते ॥ १२ ॥
इति श्री शंकरकृत श्रीनृसिंहमंत्रराजपदस्तोत्रम् ॥